“कर्मणा यमभिप्रैति स सम्प्रदानम्” इति सूत्रविचारः

जयवन्तः चौधरी

भगवान् पाणिनिः अष्टाध्याय्यां प्रथमाध्याये चतुर्थे पादे कारके इत्यधिकृत्य ध्रुवमपायेऽपादानम्[1] इत्यादिभिः सूत्रैः कारकसंज्ञां विदधत् अपादानादिविशेषसंज्ञाः अपि व्यधासीत्। द्वितीयाध्याये तृतीये पादे अनभिहिते[2] इत्यधिकृत्य कर्मणि द्वितीया इत्यादिभिः त्रिसप्तत्या सूत्रैस्सप्त विभक्तीः व्यधात् । आदावपादानादिकारकाणामभिज्ञानन्ततः कारकविभक्तीनां प्रवर्तनमित्ययं क्रमः अष्टके दृश्यते। तत्र कारकेषु सम्प्रदानकारकविधायकसूत्रं प्रबन्धेऽस्मिन् विमृश्यते।

अष्टाध्याय्यां प्रथमाध्यायस्य चतुर्थपादे "कारके" इत्यधिकारे वर्तते "कर्मणा यमभिप्रैति स सम्प्रदानम्[3]" इति सूत्रम्। कर्मणा यम् अभि प्र एति सः सम्प्रदानम् इति सप्तपदात्मकमिदं सूत्रम्। "कुगतिप्रादयः" इति सूत्रस्थम् "उदात्तवता गतिमता च तिङा गतेः समासवचनम्" इति वार्तिकमत्र प्रमाणम् । 'देवो देवान् क्रतुना पर्यभूषयत्[4]' 'यस्मानृ ऋते विजायन्ते जनासो' इत्यादीन्युदाहरणानि। अत्र तिङन्तमुदात्तवद्भवति "यद्वृत्तान्नित्यम्[5]" इति निपातप्रतिषेधात्। तत्र आचार्यः हरदत्तः - वार्तिकमेतच्छन्दोमात्रविषयम्, अयमभिप्रैतीत्यत्रापि समासे सति प्रातिपदिकत्वात् विभक्त्युत्पत्तिर्माभूदित्येतदर्थम्[6] इति । छन्दोवत्सूत्राणि भवन्ति[7] इति मतमाश्रित्य अत्र समासोऽवश्यं भवतीति केचित्। अस्य भाषाविषयत्वे तु यत् प्रकुरुते इत्यादौ समाससंज्ञायां सोः उत्पत्तिः स्यात् । लिङ्गसर्वनामनपुंसकतामभ्युपेत्य स्वमोर्नपुंसकात् इति सूत्रेण कृते लुकि ह्रस्वो नपुंसके प्रातिपदिकस्येति ह्रस्वापत्तिः । यत् प्रकुर्वीरन् इत्यत्र तु

---

1 अष्टाध्यायी सूत्रपाठः – 1.4.24

2 अष्टाध्यायी सूत्रपाठः – 2.3.1

3 अष्टाध्यायी सूत्रपाठः – 1.4.32

4 वै. सि. कौ. - बालमनोरमाव्याख्या - सह सुपा – 2.1.4

5 अष्टाध्यायी सूत्रपाठः – 8.1.66

6 काशिकाव्याख्या पदमञ्जरी – 1.4.32 कर्मणा यमभिप्रैति स सम्प्रदानम्

7 पातञ्जलमहाभाष्यम् – 1.1.1 वृद्धिरादैच्, नवाह्निकरूपः प्रथमः खण्डः, पृ. सं -153

नलोपापत्तिरिति वार्तिकस्य छन्दोविषयत्वमवश्यमभ्युपेयम्।

सूत्रे यं स ग्रहणं व्यर्थमध्याहारेणापि सर्वनामद्वयार्थस्य लाभात् । न च यं स इत्युपदेशाभावे राजा विप्राय गां ददाति इत्यत्र राज्ञः सम्प्रदानसंज्ञाविधाने गोः कर्मसंज्ञा न स्यात्। गो इत्यस्यावश्यं कर्मसंज्ञा भवति। कर्तुरीप्सिततमं कर्म[8] इति सूत्रे कर्तृपदं न कर्तृसंज्ञापरम्। अपि तु स्वतन्त्रोपलक्षकम्। राजा च दानक्रियायां स्वतन्त्रः । अतः स्वतन्त्रत्वात् ईप्सिततमस्य गोः कर्मसंज्ञा सिद्ध्यति। अपि च अभिप्रयतः कर्तुः सम्प्रदानत्ववारणाय यं स ग्रहणम्। तथाहि - अभिप्रैतीति कर्तृतिङ्वृत्त्या यः सः इत्येव लभ्यते। तथा च तदर्थसम्बन्धेनैव निराकाङ्क्षतया यं सः इत्यध्याहारो नोपपद्यते । तथा च कर्मणा यः अभिप्रैति स सम्प्रदानम् इति सूत्रार्थलाभात् कर्तुरेव सम्प्रदानत्वापत्तिः । कर्तृसंज्ञा तु अकर्मकधातुस्थले सावकाशा स्यात् । उपाध्याया शिष्येण गौर्दीयते इत्यर्थे शिष्यायोपाध्यायस्य गौर्दीयते इति प्रयोग आपद्यत इति दोषः। अतः सूत्रे यं सग्रहणं कर्तव्यम्। तेन अभिप्रयतुः कर्तुः सम्प्रदानत्वं वारितं भवति।

कर्मणा यमेति गच्छति प्राप्नोति सम्बध्नातीत्यर्थः उपसर्गद्वयाभावेपि लभ्यत एवेति उपसर्गद्वयग्रहणमनर्थकम् । सन्निहितसम्प्रदानस्थले दानस्य तत्काले विप्रसन्तोषरूपहृष्टफलत्वात् तत्रैव सम्प्रदानत्वं स्यात्; असन्निहितसम्प्रदानस्थले विप्राय ददातीति न स्यात् उपसर्गद्वयग्रहणाभावे। सूत्रेऽभिराभिमुख्येऽस्ति। प्रशब्दश्चादिकर्मणि। कर्मणा करणभूतेन कर्ता क्रियारम्भे यमुद्दिशति सः सम्प्रदानमिति सूत्रार्थः पर्यवस्यति । स चोद्देश्यः सन्निहितेऽसन्निहिते च सर्वत्र वर्तत इति विप्राय गां ददाति, विप्राय गामदात्, विप्राय गां दास्यतीत्यादिप्रयोगा अप्युपपद्यन्ते । त्यज्यमानद्रव्योद्देश्यत्वे सति स्वीकारार्हत्वं सम्प्रदानत्वमिति लक्षणं दृश्यते सम्प्रदानस्य । स्वीकारश्चात्र यथेष्टविनियोगयोग्यतोपधायकः प्रतिग्रहः। विप्राय गां ददातीत्यत्र त्यज्यमानद्रव्योद्देश्यत्वं कर्तुर्विप्रेऽस्ति। यथेष्टविनियोगयोग्यता उपाधायकप्रतिग्रहत्वं च विप्रे वर्तत इति लक्षणसमन्वयः । उद्देश्यत्वस्वीकारे च गवा विप्रस्य सम्बन्धः। उद्देश्यत्वं हि त्यागकालीनचतुर्थ्यन्तपदोच्चारणजन्यज्ञानविषयत्वम्।

यथोक्तं कर्तुरीप्सिततमं कर्म इत्यत्र कर्तृपदं स्वतन्त्रोपलक्षकम्[9] इति । स्वातन्त्र्यं च

[8] अष्टाध्यायीसूत्रपाठः – 1.4.49यदुदासीनं……..पृथक् पृथक् इति, वै.भू.सा. पृ.१७८-१७९

[9] कर्मसंज्ञायां हि कर्तृग्रहणं स्वतन्त्रोपलक्षणार्थमिति तेन शिष्यस्य कर्तृ त्वाभावेऽपि गोः कर्मसंज्ञा युज्यत एव। काशिकाव्याख्या पदमञ्जरी – 1.4.32 कर्मणा यमभिप्रैति स सम्प्रदानम्

हीयते इत्यत्र कर्मणि लकारस्सिद्धो भवति। सार्थ एनं जहाति इत्यस्मिन् वाक्ये कर्मणि प्रत्ययेऽयं सार्थात् हीयते इति प्रयोगस्योपपत्तिर्भवतीत्यर्थः । सार्थो नाम मनुष्यसमुदायः, समुदायश्च समुदाय्यवयवाभिन्नोऽयमिति तत्समुदायावयव इति सार्थस्य अपादानत्वेपि निरुक्तस्वातन्त्र्यं सार्थस्यास्त्येवातः कर्मणि प्रत्यये सार्थात् हीयत इत्ययं प्रयोगः सूपपन्नः। अर्थात् हीयत इत्यत्र सार्थस्य धात्वर्थप्रधानव्यापाराश्रयत्वेऽपि अपादाने चाहीयरुहोरिति[10] ज्ञापकात् कर्मप्रत्ययान्ते हीधातुना योगे अपादानत्वम्, सार्थेन त्यज्यतेऽयमित्यर्थः । अत्र कर्मसंज्ञायां कर्तृपदं स्वतन्त्रोपलक्षकम्। अतः कर्मणि लकारस्य सिद्धिर्भवति।

चतुर्थी कारकविभक्तिः । कारकचतुर्थ्याः सम्प्रदानशक्तिमान् अर्थः । सा च शक्तिः तत्तद्धात्वर्थकर्मनिष्ठफलनिरूपकत्वेन इच्छाविषये यस्तन्निष्ठा। विप्राय गां ददातीत्युदाहरणम्। अत्र लक्षणसमन्वयः तत्तद्धात्वर्थसम्बन्धि यत्कर्म गवादि, तन्निष्ठं यत्फलं स्वत्वादि तन्निरूपकत्वेन य इच्छाविषयः गोनिष्ठस्वत्वनिरूपको भवतु इति दातुरिच्छाविषयः ब्राह्मणादिस्तस्य सम्प्रदानसंज्ञा।

अन्वर्थसंज्ञालाभाय सम्प्रदानमिति महती संज्ञा क्रियते। तेन सम्यक् प्रदीयतेऽस्मायिति तत् सम्प्रदानमिति फलति। दानक्रियाकर्मणा कर्ता यमभिप्रैति सम्बध्नाति ईप्सति वा तत् कारकं सम्प्रदानसंज्ञकं भवतीत्यर्थः। तेन अजां ग्रामं नयति, हस्तं वृक्षे निदधाति इत्यादौ सम्प्रदानसंज्ञा न भवति । स्वस्वत्वध्वंसपूर्वकपरस्वत्वोत्पत्त्यनुकूलव्यापारः दानमित्युच्यते । किञ्चित् उद्दिश्यापुनर्ग्रहणाय स्वद्रव्यत्यागो वा दानम् । यथा - "कृष्णाय पारिजातं ददाति" इति । स्वस्वत्वनिवृत्तिपूर्वकपरस्वत्वापादनं वा दानम्। अतः रजकस्य वस्त्रं ददाति इत्येव प्रयोगः न तु रजकाय वस्त्रं ददातीति । यतः अत्र स्वस्वत्वनिवृत्तिः नास्ति नापि परस्वत्वापादनम् इति वृत्तिकृन्मतम्।

भाष्यकारः नान्वर्थसंज्ञायामाग्रहवान् इत्यतः रजकाय वस्त्रं ददातीत्यपि प्रयोगः साधुरेव। दा-धात्वर्थः अत्र भाक्तः लाक्षणिकार्थप्रतिपादक इत्यर्थः। भक्तिर्लक्षणा तत् प्रयोज्यः भाक्तः। तत्र प्रमाणन्तु खण्डिकोपाध्यायः (वृद्धाध्यापकः / अथर्ववेदशाखाध्यापको वा) शिष्याय चपेटां (प्रसृतकरतलं चपेटा) ददाति[11] इति वृद्धिरादैच् इति सूत्रस्थः भाष्यप्रयोगः। अत्र दुःखं फलम्।

[10] अष्टाध्यायी सूत्रपाठः – 5.4.45

[11] पातञ्जलमहाभाष्यम् – 1.1.1 वृद्धिरादैच्, नवाह्निकरूपः प्रथमः खण्डः, पृ. सं - 170

ददातिरत्र संयोगविशेषानुकूलव्यापारार्थकः । चपेटासंयोगजन्यदुःखाश्रयः शिष्यः भवतु इतीच्छया दुःखरूपफलाश्रयत्वेन शिष्यस्य सम्प्रदानत्वम्। रजकाय वस्त्रं ददातीत्यत्र दा-धातुः अधीनीकरणार्थकः । अधीनीकरणत्वञ्च मलनाशानुकूलं स्थापनम् । तथा च वस्त्रनिष्ठमलनाशरूपफलसम्बन्धेन भृतिमान् रजको भवत्वितीच्छया रजकस्य भृतिरूपफलाश्रयत्वेन सम्प्रदानत्वम्। विप्राय गां ददाति इत्यत्र विप्रस्य शेषित्वम्। गोश्च शेषत्वम् । शेषित्वञ्च धात्वर्थक्रियायाः यत्कर्म तद्वृत्तिमत् धात्वर्थफलं तत्सम्बन्धजन्यफलाश्रयत्वकेच्छाविशेष्यत्वम् । दानकर्मगोवृत्तितादृशस्वत्वसम्बन्धजन्यसुखाश्रयो विप्रः भवत्वित्याकारिका येच्छा तादृशेच्छाविशेष्यत्वरूपं विप्रस्य शेषित्वं तादृशेच्छाप्रकारताश्रयत्वरूपं च गवि शेषत्वमिति समन्वयोऽत्र द्रष्टव्यः।

सम्प्रदानं हि त्रिविधम् -

अनिराकरणात्कर्तुः त्यागाङ्गं कर्मणेप्सितम्।
प्रेरणानुमतिभ्याञ्च लभते सम्प्रदानताम्[12] ॥

अनिराकर्ता, प्रेरयिता, अनुमन्ता इति सम्प्रदानस्य त्रयो भेदाः सूर्याय अर्घ्यं ददातीत्याद्यम्। अत्र सूर्यः न वा अर्घ्यदानं प्रार्थयते, नाप्यनुमन्यते, न च निराकरोति । विप्राय गां ददातीति प्रेरयितुरुदाहरणम्। अत्र मह्यं गां देहि इत्येवं विप्रेण प्रार्थितः राजा तस्मै गां ददाति। विप्रे दानात्पूर्वं दानव्यापारप्रेरकत्वमस्ति । उपाध्यायाय गां ददातीति अनुमन्तुरुदाहरणम् । चतुर्थ्याश्च उद्देश्योऽर्थः।

अकर्मकस्थलेषु कर्मणोऽभावात् कर्मणाभिप्रेयमाणं सम्प्रदानमित्येतन्न सम्भवतीति 'पत्ये शेते' इत्यादिषु सम्प्रदानसंज्ञा, तन्निमित्तिका चतुर्थी च दुर्लभा । अतस्तत्र वार्तिकमुक्तम् - क्रियाग्रहणम्[13] इति। क्रियाग्रहणमपि कर्तव्यम्, इहापि यथा स्यात् - श्राद्धाय निगर्हते, युद्धाय सन्नह्यते, पत्ये शेते[14] - इति कर्मणा यमभिप्रैति स सम्प्रदानम् इति सूत्रस्थं भाष्यम्। एवञ्च क्रियया यमभिप्रैति सोपि सम्प्रदानमिति वक्तव्यम् इति वार्तिकस्याशयः । श्राद्धविषयकनिन्दामाविष्करोति, युद्धविषयकं सन्नहनपूर्वकं निश्चयं करोति, पतिमुपसृत्य शेते

[12] वाक्यपदीयम् – 3.7.129

[13] पातञ्जलमहाभाष्यम् – 1.4.32 कर्मणा यमभिप्रैति स सम्प्रदानम्, द्वितीयः खण्डः, पृ. सं. 256

[14] पातञ्जलमहाभाष्यम् – 1.4.32 कर्मणा यमभिप्रैति स सम्प्रदानम्, द्वितीयः खण्डः, पृ. सं. 256

इत्येवमर्थः इति तत्र कैयटः।

कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसंप्रत्यय[15] इति न्यायात् सूत्रे च कर्मपदं कारकपरं, न क्रियापरम्। क्रियाया अपि कर्तुरीप्सिततमं कर्मेति सूत्रेण कर्मसंज्ञा सम्भवतीति प्रदर्श्य वार्तिकं प्रत्याचख्ये भाष्यकारः। तथाहि क्रिययापि क्रिया ईप्सिततमा भवति, सन्दर्शनक्रियया प्रार्थयतिक्रियया अध्यवस्यतिक्रियया चेति तत्रत्यं वाक्यम्। तस्यायमाशयः - मायोपहितचैतन्याभिन्नेन आत्मना साधनेन कर्ता सन्दर्शनक्रियाम् (यत्किञ्चित्फलविषयिकां सङ्कल्पनक्रियाम्) ईप्सति, अतः सन्दर्शनक्रियायाः कर्मसंज्ञा। सन्दर्शनक्रियया च प्रार्थयतिक्रिया आप्तुम् इच्छति, अतः प्रार्थयतिक्रियायाः कर्मसंज्ञा। प्रार्थयतिक्रियया अध्यवस्यतिक्रियाम् (कया चेष्टया फलं मे सिध्येत् इति सम्यक् विचिन्त्य, कञ्चिच्चेष्टाविशेषं फलसाधनत्वेन विनिश्चिनोति, तामिमां निश्चिनोतिक्रियाम्) आप्तुम् इच्छति, अतः अध्यवस्यतिक्रियायाः कर्मसंज्ञा। अध्यवस्यतिक्रियया आरम्भणक्रियाम् आप्तुमिच्छति, अतः आरम्भणक्रियायाः कर्मसंज्ञा। आरम्भणक्रियया शयनादिं निश्चितां क्रियामीप्सति, एवञ्छ शयनादिक्रियायाः कर्मसंज्ञा। तथाभूतेन कर्मणा पत्यादेरभिप्रेयमाणता सम्भवत्येवेति यथास्थितसूत्राक्षरैरेव पत्ये शेते इत्यादिप्रयोगा उपपद्यन्त इत्यतः क्रियाग्रहणं न कर्तव्यमिति फलति।

इयं च साधनपरम्परा आत्मादिरारम्भावधिका सर्वक्रियाविषयिका, अतः सर्वेषामपि कर्मसंज्ञकानां क्रियारूपकर्मणाभिप्रेयमाणत्वस्य अव्यभिचारात् सम्प्रदानत्वमापद्यते इत्याशङ्का न कार्या; विप्राय गां ददातीत्यादौ, पत्ये शेते इत्यादौ च सावकाशायाः सम्प्रदानसंज्ञायाः अनवकाशा कर्मसंज्ञा बाधिका भवति, अतः कटं करोति इत्यादौ इष्टं सिध्यति। पर्यायप्रसङ्गः न शङ्क्यः, गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि[16] इति सूत्रेण अध्वभिन्ने गत्यर्थानां कर्मणि चेष्टायां द्वितीयाचतुर्थ्यौ विहिते इति ततोऽयत्र पर्यायः अनिष्ट इति फलति। इति शम्।

---

[15] पातञ्जलमहाभाष्यम् – 1.1.23 बहुगणवतुडति सङ्ख्या, नवाह्निकरूपः प्रथमः खण्डः, पृ. सं. 303

[16] अष्टाध्यायीसूत्रपाठः – 2.3.12